संस्कृत. याज्ञिक.

क्र. १. १८

# हिरण्यकेशी समावर्तनप्रयोग.

(12)

पत्रे ८

जगन्नाथ जगोबा दीक्षित

लिपिकार.

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1) श्रीगणेशायनमः॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम गृहस्थाश्रमाधिकारसिद्धिद्वारा
श्रीपरमेश्वरप्रीत्यर्थं समावर्तनाख्यं कर्म करिष्ये तदंगं गणपतिपूजनं पुण्या० मातृ० नांदी० चे क
रिष्ये इति संकल्प्य उक्तरीत्या कुर्यात्। श्रीप्रीयतां। समावर्तनांगहवनं कर्तुं स्थंडिलादि सकलं
कर्म करिष्ये स्थंडिलं गोमयेनोपलिप्येत्यादि स्थंडिलसंस्कारं विधायेतत्र पावकनामानं लौकिक
मग्निं प्रतिष्ठाप्य प्रज्वाल्य ध्यात्वा समावर्तनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये। समित्त्र
यमादाय अत्र इरहीत्यादि प्राणायामांतं कृत्वा समावर्तनहोमकर्मणि यायक्ष्यमाणा देवता इत्या
दिव्याहृत्यंतमुक्त्वा वैशेषिकप्रधानहोमे जातवेदसमग्निं पालाशसमिधा यक्ष्ये अग्निं वायुं
सूर्यं प्रजापतिं च एकैकयाज्याहुत्या यक्ष्ये अग्निं आज्याहुत्या यक्ष्ये। अंगहोमे वरुणं द्वि रि
त्यादि पात्रासादनकाले पलाशसमिद्दंतधावनं औदुंबरकाष्ठं उच्छशीता आपः क्षुरं अ
नडुहं गोमयं सौरभयुक्तं चंदनं वाससी कुंडले चादर्शमणिं आदर्शं छत्रं दंडं उपानहौ स्रजं
अंजनं आज्यं चासादयामि इत्यासाद्य ततः पवित्रकरणादि व्याहृत्यंतं कृत्वा प्रधानहोमं कुर्यात्।
॥ ३ ॥ इमं स्तोमं मर्हते जातवेदसे रथमिव संमहेमा मनीषया। भद्राहि नः प्रमतिरस्य संसद्य
त्रिवृद्देनं २

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

समा० ज्ञेसरव्येमारिषामावयंतवस्वाहा। जातवेदसेग्नयइदं। पालाशीः समिधं जुहोति। ततः व्यस्तसमस्त
१ क्रमेणव्याहृतिराज्येनकृत्वा। त्र्यायुषंजमदग्नेः कश्यपस्यत्र्यायुषंयद्देवानांत्र्यायुषंतन्मेअस्तुत्र्या
युषं स्वाहा। अग्नयइदं। इतिषट्प्रधानाहुतीर्हुत्वा। ततइमंमेवरुणेत्यादित्रयोदशंनहोमंपुण्याह
(2) वाचनांतंकृत्वा ततः उपनयनेस्वीकृतानांसकलब्रह्मचारिव्रतानां विसर्गंकरिष्येइतिसंकल्प्य। देव
ताअभिसंधायोपतिष्ठते॥ अग्नेव्रतपतेव्रतं [redacted] न्मेराधि। वायोव्र० आदित्य० व्रता०
इतिव्रतविसर्गंकृत्वा। आदित्यमुपतिष्ठते। उदुत्यंजातवेदसं० यं। चित्रं० षश्च। ततउत्तरीयं अजिनं
वासोनिदधाति। उदुत्तमंवरुणपाशमस्मद्रुथाय। अन्यद्वासः परिधायद्विराचम्य। अंतरीयवा
सो नाम अपरीयं कौपीनाच्छादनंवासः। अवाधमंवरुणपाशमस्मद्रुथाय। ततोमेखलांनिदधा
ति। विमध्यमंवरुणपाशमस्मद्रुथाय। ततोदंडंनिदधाति। अथावयमादित्यव्रते तवानागसो अ
दितयेस्यामि। अजिनंवासोमेखलांदंडंचाशक्तस्तूष्णींअस्यअंतरीयंवासोर्थिनेब्रह्मचारिणेदद्या
त्। ततः अपरेणाग्निंप्राङ्मुखउपविश्य क्षुरोनामासिस्वधितिस्तेपितानमस्तेअस्तुमामाहिंसी
सीः क्षुरं संमृशति। तूष्णींवस्त्रंप्रदाय शीतास्वपस्उष्णाआनीयदक्षिणंगोदानमुनत्ति। आपउंदं
तुजीवसेदीर्घायुत्वायवर्चसे। गोदानोऊर्ध्वाग्रान्कुशांनिदधाति। ओषधेत्रायस्वेनं। तस्याप

शिवानोभवथभसरं स्पृशेरसापोनिम्नेनापि

रिक्षुरंनिदधाति।स्वधितेमैनं हिंसीः।देवश्रूरेतानिप्रवपेइतिप्रवपति।ततःयत्क्षुरेणवर्चयथा
सुपेशसावप्तर्वपति।केशाः श्मश्रुवर्चयामुखंमानआयुःप्रमोषीरिति।ततश्मश्रूपपक्षक्रमेण
मुखस्यसर्वश्मश्रूणांवपनंशिखांविहायशिरस्थसर्वकेशानांबहुमूलमारभ्यसर्वलोम्नां
नखानांचवपनंकारयेत्।स्नातकस्यबंधुजनःकश्चित्आनडुहेगोमयेश्मश्रुलोमनखानि
अंतर्धायगोष्ठउदुंबरेदर्भस्तंबेवाअवटंकृत्वानिदधाति।इदमहंअमुकनामशर्मणोकौशि
कस्यपाप्मानमवगूहामि।अथस्नातकःकरंजकल्कायुद्वर्तनेनशरीरमलंदूरीकृत्य।
अंनाद्यायव्यूहध्वंदीर्घायुत्वायव्यूहध्वंदीर्घायुरहमंनादोब्रह्मवर्चसीभूयासं।ततऔ
दुंबरकाष्ठेनदंतान्३ब्रह्मवर्चसायव्यूहध्वं३शोधयेत्।ततःतूष्णींद्वादशगंडूषान्कुर्यात्।
ततःआचार्योन्योवाब्रह्मचारिणेआपोहिष्ठेतितिसृभिःहिरण्यवर्णाइतिचेतसृभिःपव
मानःसुवर्जनइतिचैतेनानुवाकेनउष्णसीताभिरद्भिःस्नापयति।इदंस्नानंअनुवाकांते।
केचित्तुप्रथमंमंत्रंस्नानमिच्छंति।ततोद्विराचम्यतूष्णींलौकिकंवासःपरिधायद्विराचम्य।क
टिसूत्रंकौपीनंचविस्रस्यप्रज्ञातंनिधाय।आसादितंचंदनपिष्टंजलेनाभ्युक्ष्य।तेनपाणी

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सभा॰ प्रक्षिप्य। नमोग्रहाय चाभिग्रहाय च नमः शाकजंजभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीरिति। दे
२ वेभ्यः प्राचीनं नमस्कारांजलिं करोति। अप्सरासु च यो गंधो गंधर्वेषु च यद्यशः। दैव्यो यो मानुषो गंधः
समामाविशतादिह। तेनांजलिना मुखमारभ्यानुलोमं आत्मानं अनुलिंपति। तत आसादिते अहते
(3) वाससी जलेनाभ्युक्ष्य। परिहितं पूर्ववासः परित्यज्य आसादितयोर्वाससोर्मध्ये एकं वास आसाद्य
प्रदक्षिणं संवेष्ट्य सोमस्य तनूरसि तनुवं मे पाहि स्वा मा तनूराविश शिवा मा तनूराविश इति प्रदक्षिणं वेष्टितं वा
सः नीविकल्पनादिप्रकारेण परिदधाति। ततो द्विराचम्य तेनैव मंत्रेण उत्तरीयसंज्ञकं वासः परिदधाति। ततो
द्विराचम्य प्रज्ञाते निहितं कटिसूत्रं कौपीनं चाप्सु प्रक्षिपेत्। अतऊर्ध्वं कटिसूत्रकौपीनधारणं न कार्यं।
अथापरेणाग्निं प्राङ्मुख उपविश्य आसादितं चंदनं बादरं वा सुवर्णाभिच्छादितं मणिं आसादिते कुंडले चा
दाय धर्मेण प्रबध्य अग्नौ धारयन्। आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं। इदं हिरण्यमायुषे वर्चसे जै
त्रायाविशतां मां स्वाहा॥ हिरण्यायेदं। उच्चैर्वाजि पृतनासाहं सभासाहं धनंजयं। सर्वाः समग्रा ऋद्
यो हिरण्येस्मिन् समाभृतास्वाहा॥ हिरण्यायेदं॥ प्रियं मा कुरु देवेषु प्रियं मा ब्रह्मणि कुरु॥ प्रियं विश्येषु शूद्रेषु प्रि
यं मा कुरु राजसु स्वाहा॥ हिरण्यायेदं। इयमोषधे त्रायमाणा सहमाना सहस्वती॥ सा मा हिरण्यवर्चसं करोतु पुरु
षु प्रियं ब्रह्मवर्चसिनं मा करोतु स्वाहा॥ ओषध्या इदं। इति पूर्वाभिर्मंत्रैः प्रतिमंत्रं एकेनाज्येन दर्व्या पंचभिर्मंत्रैः स्त्रुक्पर्य २
भिर्जुहोति। ततः स्त्रुत्वप्रहरणादि होमशेषं समाप्य। नात्राग्नेः परिषेकः। मणिकुंडलसंस्कारलात्। ततः आ

भुनमहः

…odhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the Rajwade Sanshodhan…

युष्यं वर्चस्यं रायस्पोषमौद्भिदं। इदं हिरण्यमायुषे वर्चसे जैत्रायाविशतात्। उच्चैर्वाजिपृतनासाहं
सभासाहं धनंजयं। सर्वाः समग्रा ऋद्धयो हिरण्येस्मिन् समाभृताः। शुनमहं हिरण्यस्य पितुरिव नामा
ग्रभिषं। तं मा हिरण्यवर्चसं करोतु पुरुषु प्रियं ब्रह्मवर्चसिनं मा करोतु पुरुषु प्रियं ब्रह्मवर्चसिनं माक
रोतु प्रियं मा कुरु देवेषु प्रियं मा ब्रह्मणि कुरु प्रियं विश्येषु शूद्रेषु प्रियं मा कुरु राजसु इयमोष
धे त्रायमाणा सहमाना सहस्वति सा मा हिरण्यवर्चसं करोतु पुरुषु प्रियं ब्रह्मवर्चसिनं मा कुरो
तु। एतैरेव पंचभिर्मंत्रैः सर्वांतिमणिकुंडले च सहैव त्रिः प्रदक्षिणमुदपात्रे सम्यक् प्रक्षालयति।
सकृन्मंत्रैर्हिरण्यसूक्ष्णी विराजं च स्वराजं चाभिष्टीर्याचनो गृहे। लक्ष्मी राष्ट्रस्य नो गृहे तया मा सं सृ
जामसीति। दक्षिणे कर्णे दक्षिणं कुंडलं प्रतिमुंचति। ऋतुभिष्ट्वार्तवैरायुषे वर्चसे संवत्सरस्य धाय
सा तेन संनतुग्रह्णामि दक्षिणकर्णस्थ कुंडले यथा न पतति तथा विदधाति। विराजं च० मसि। वा
मकर्णे उत्तरं कुंडलं प्रतिमुंचति ऋतुभिष्ट्वार्तवै० गृह्णामि सव्यकर्णस्थकुंडलं यथा न पतति त
था विदधाति। इयमोषधे त्रायमाणा सहमाना सहस्वती सा मा हिरण्यवर्चसं करोतु पुरुषु प्रि
यं ब्रह्मवर्चसिनं मा करोत्वपाशोसीति। इति ग्रीवायामभिहोमसंस्कृतं मणिं बध्नाति।

समा० शुभिकेशुभमारोहशोभयंतीमुखंमम।मुखंचममशोभयभूयांसंचभगंकुरुयामाहरज्ज
२ मदग्निःश्रद्धायेकामायास्यै इमांतांप्रतिमुंचेहंभगेनसहवर्चसा। द्वाभ्यामासादितांस्रजं
धारयति यदांजनंत्रैककुदंजातंहिमवतउपरि तेनवामांजेहंभगेसेनहवर्चसामयिपर्वतपूरुषं।
इत्यासादितेनांजनेनद्वाभ्यांहस्ताभ्यांयुगपद्दक्षिणमनक्ति तेनवामितिद्विवचनलिंगात्।के
(५) चित्तु।यदांजनमितिमंत्रेणदक्षिणेनहस्तेनसव्यमनक्ति।एतेनैवमंत्रेणदक्षिणं सव्यस्याक्ष्णःपू
र्वमंजनं सव्यंहिपूर्वंमनुष्याआंजतइतिश्रुतिसिद्धमितिवदंति तेषांद्विवचनलिंगविरोधःस्फु
टएव यन्मेमनःपरागतंयद्वामेअपरागतं रा[illegible]नंश्रासोमेनतद्वयमस्मासुधा
रयामसि इत्यात्मानमादर्शेवेक्षते देवस्यत्वा०॥हस्ताभ्यांप्रतिगृह्णामि इत्यासादितंवैणवंदं
डंसोदकेनहस्तेनत्रिरुन्मार्ष्टि. वेणवेजयास्त्वद्विषतस्तस्करान्सरीसृपान्श्वापदान्रक्षांसिपि
शाचान् पौरुषेयाद्भयान्नोदंडरक्षविश्वस्मा।द्भयाद्रक्षसर्वतोत्वंहि तस्करानन्नःसर्वरक्षेषु
जायतेत्वं सपत्नहा।आहिशत्रुगणान्सर्वान्त्समंतंमघवानवेति।सकृन्मंत्रमुक्त्वा शिरसउप
रिप्रदक्षिणंदंडंत्रिर्भ्रामयति।यदिप्रमादाद्धस्ताद्दंडःपतति।तंपुनरादत्ते योमेदंडःपरापतद्वि
हायसोधिभूम्यां इमंतंपुनरादेदयमायुषेचबलायचेति प्रतिष्ठेस्थोदेवतेमामासंताप्तं।उपवि
इंद्रस्यवज्रोस्यभिधिर्नोमापातइतित्रिरूर्ध्वमुन्मार्ष्टि ३

१ आनयंत्यस्मैरथमश्वं हस्तिनं वा रथं तु रमसि वामदेव्यमसि हृदस्यै कोन्यं कायभितइत्येव ॥ अयं वामश्विना रथो मा दुरेवमासु रवे रिषत् ॥ अरि
२ ष्टस्यस्ति गच्छतु विविध्नं नीनिदासतः इह धृतिरिह विधृतिरिह रमेइह रमतामिति रथमातिष्ठते रथेन प्रविशति ॥ २ यद्यश्वेनं हस्यसावेनेणा
३ स्युपविशामि यह कालं वह श्रियं मामियह हस्त्यसि हस्तियशा मसि हस्तिवर्चसम सि हस्तियशासि हस्तिवर्चसी भूयासमिति हस्तिनं य

(5A)

ष्टएवोपानहो युगपद्व ध्यवरोहति सकृदेवमंत्रः । प्रज्ञातेशारणमसि ब्रह्मणश्छदिरिति ।
छत्रं प्रतिगृह्णाति । अश्वोसि हयोस्यत्योसि नरोस्यर्वासि सप्तिरसि वाज्यसि वृषासि
नृमणा असि ययुर्नामासि । इत्येकादशाश्वनामात्मकेमंत्रैरश्वारोहणं । ततः पूजा
कर्तायामांतरश्वेत् । अश्वाद्यारोहणप्रयोगः । एवमेव पूजाकर्ता तदावाहनारोहणा
भावः । स ऋत्रयंतु दिशो मयि समागच्छंतु सूनृताः । सर्वे कामा अभियंतु नः प्रियाः इति
सकृन्मंत्रमुक्त्वा दिशा उपतिष्ठते ततो यत्र पूजा करिष्यंतो भवति तत्र गच्छति । गच्छंते
व वा । यशो सि यशोहं त्वयि भूयासमनु कूर्मर्भत् । यः पूजां करिष्यन्भवति तमाभि
मुख्येन समीपं गच्छन् यानादवरुह्याथ वा सम्यगीक्षते । अथमधुपर्कः ॥
पूजकः पूज्यस्य उदङ्मुख उपविश्य आचम्य प्राणानायम्य देश० इमं स्नातकं
मधुपर्केण पूजयिष्ये । इतिसंकल्प्य विवाहोक्तरीत्या मधुपर्कं कुर्यात् ब्राह्मण
भोजनसंकल्पं कुर्यात् । भूयसीं दद्यात् कर्मसाद्गुण्यायविष्णुं स्मरेत्

दृढैनं तदक्षणितिय शास्मा अपचितिम क्रियं तो भयं ति ३

Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

इत्येकोपाह्वश्रीमत्कृष्णेश्वरदीक्षिततनुजगोपीनाथदीक्षितविरचितायां सत्याषाढहिरण्यकेशिस्मार्तसंस्काररत्नमालायां समावर्तनप्रयोगः ॥ ८८ ॥
॥ ८८ ॥ ८८ ॥ ८८ ॥ ८८ ॥ ८८ ॥ ८८ ॥

लं खिलिं न ले ख गोट भे रीपोग

आचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्य अमुकशर्मणो ब्रह्मचारिणः करिष्यमाण प्राजापत्य सौम्याग्नेय वैश्वदेवाख्य काण्डचतुष्टय व्रतोपाकरणोत्सर्जन गोदान समावर्तन संस्काराङ्गभूतं गणेशपूजनं पुण्याहवाचनं मातृ० नान्दीश्राद्धं करिष्ये निर्विघ्नार्थं गणपतिपूजनं करिष्ये। ब्राह्मणान्प्रति अस्य० इत्यादि करिष्यमाण प्राजापत्य सौम्याग्नेय वैश्वदेवाख्य काण्डचतुष्टय व्रतोपाकरणोत्सर्जन गोदान समावर्तन संस्कारकर्मणां पुण्याहं० । द्वितीय कर्मभ्यः ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com